ALANKARASASTHRA-I

Study material

VI SEMESTER

B.A SANSKRIT

CORE COURSE
(2011 ADMISSION)

UNIVERSITY OF CALICUT

SCHOOL OF DISTANCE EDUCATION

THENJIPALAM, CALICUT UNIVERSITY P.O., MALAPPURAM, KERALA - 673 635

UNIVERSITY OF CALICUT
SCHOOL OF DISTANCE EDUCATION
Study material

VI SEMESTER
B.A SANSKRIT

CORE COURSE
ALANKARASASTHRA-1

Prepared by

Dr. Ajitha T.S.,
Assistant Professor in Sanskrit,
Sri.Achuthamenon Govt. College ,
Kuttanellur, Thrissur

Scrutinised by :

Dr. Jayanarayanan K.
Associate Professor,
Sree Kerala Varma College,
Thrissur

Type settings & Lay out
Computer Section, SDE

Module I

Introduction to Sanskrit Poetics and its growth and Major schools of thought

Module II

Kavyalankara of Bhamaha. chapter I

Module III

Kavyadarsha of Dandin. Pariccheda I

Essential reading

1. History of Sanskrit Poetics-S.K.De
2. Kavyalankara of Bhamaha
3. Kavyadarsha of Dandi

Additional reading

1. History of Sanskrit Poetics- P.V.Kane
2. Studies on some concepts of Alankarasastra-Dr. V.Raghavan
3. Sanskrta sahitya vimarsanam-Dr. N.V.P. Unithiri
4. A new History of Sanskrit Poetics-Krishnachaitanya
5. Indian Kavya Literature-A.K. Warder

MODULE I

अलङ्कारशास्त्रेतिहासः

साहित्यशास्त्रं अलङ्कारशास्त्रं वा

एकस्य तिष्ठति गृह एव काव्यं ।अन्यस्य गच्छति सुहृद्भवनानि यावद् ॥

न्यस्याविदग्धवदनेषु पदानि शश्वत्।कस्यापि सञ्चरति विश्वकुतूहलीव ।

श्लोकोऽयं गुणान्वितस्य काव्यस्य महत्वं घोषयति।प्राचीनकालादारभ्य कवित्वशक्तिः सर्वैः अद्दता प्रशंसिता च आसीत्। तस्य प्राप्त्यर्थं किं किं कार्यमिति सर्वैः चिन्तितं च आसीत्। तदर्थं काव्यस्वरूपं काव्यभेदाः काव्यगुणाः काव्यालङ्काराः इत्येतान् विषयानधिकृत्य चर्चा नितरां सुलभा आसीत्। साहित्यशास्त्रनाम्ना अलङ्कारशास्त्रनाम्ना वा व्यवहितं इदं शास्त्रं वेदानां लौकिककाव्यग्रन्थानां च ज्ञानाय नितान्तमपेक्षितम्। अस्य शास्त्रस्य उपयोगित्वं अवेक्ष्य राजशेखरेण शास्त्रमिदं वेदाङ्गमेवेति निरूपितं।

उत्पत्तिः विकासश्च-

अतिप्राचीनकाले शास्त्रमिदं क्रियाकल्पनाम्ना व्यवह्रियते स्म। वात्स्यायनेन कामसूत्रे चतुष्षष्टिकलासु क्रियाकल्पस्य गणना कृता। तत्र क्रियया काव्यग्रन्थाः कल्पेन च विधानमभिप्रेतम्। तदिदं क्रियाकल्पपदं साहित्यविद्यापरं पर्यवस्यति। राजशेखरः अलङ्कारशास्त्रपरम्पराम् एवं निरूपयति। शङ्करोऽलङ्कारशास्त्रस्य शिक्षां सर्वप्रथमं ब्रह्मणे दत्तवान् ब्रह्मा च देवेभ्यः ते च ऋषिभ्यश्च। तदनुसृत्याष्टादश ब्रह्मशिष्या अष्टादशस्वधिकरणेषु शास्त्रमिदं निबद्धवन्तः। नन्दिकेश्वरो रसं धिषणो दोषान् भरतश्च रूपकाणि च निरूपितवन्तः। काश्यपः वररुचिश्च प्रथमौ आलङ्कारिकौ कथ्येते।

साहित्यशास्त्रे सम्प्रदायाः

काव्यस्य स्वरूपं किं इति विचिन्तयद्भिः बहवः सम्प्रदायाः अलङ्कारशास्त्रे प्रचलिताः। ते च प्रस्तूते

रससम्प्रदायः-

संप्रत्युपलभ्यमानो रससिद्धान्तो भरतेन प्रवर्त्तितः। तदीयं विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिरिति रससूत्रमेव रसस्वरूपनिर्णायकेषु आदिमं।ततः प्राचीनानां नन्दिकेश्वरप्रभृतीनां मतं न उपलभ्यते। भरतेन

स्वीयनाट्यशास्त्रस्य षष्ठे सप्तमे च अध्याये रसस्य विषये स्वमतं प्रकाशितम्। रससूत्रव्याख्याने निरतानां पण्डितानां मध्ये अपि मतभेदो वर्तत एव। रससूत्रे विद्यमानस्य संयोगपदस्य रसनिष्पत्तिपदस्य च व्याख्याने विद्यमानान् भेदान् अश्रित्य भट्टलोल्लटप्रभृतयः उत्पत्तिवादिनः शङ्कुकादयः अनुमितिवादिनः भट्टनायकप्रभृतयः भुक्तिवादिनः अभिनवगुप्तादयः ध्वनिवादिनश्च कथ्यन्ते।

शृङ्गारहास्यकरुणरौद्रवीरभयानकाः
बीभत्साद्भुतश्चेत्यष्टौ नाट्ये रसाः स्मृताः।

इति नाट्ये अष्टरसानां काव्ये तदतिरिक्तशान्तसहितानां नवरसानां च अस्तित्वं स्वीकुर्वन्ति।

अलङ्कारसम्प्रदायः-

अलङ्कारसम्प्रदायो भामहेन प्रवर्त्तितोऽपि तद्ग्रन्थव्याख्यातृभिः उद्भटादिभिरेव स्थिरतां प्रापितः।
एतत्सम्प्रदायानुसारिणां मते अलङ्कारा एव काव्य जीवातवः।

अलङ्करोति यः काव्यं शब्दार्थावनलंकृती।
असौ न मन्यते कस्मादनुष्णमनलंकृती॥ इति कथयन् जयदेवोऽपि काव्ये जीवनाधायकतया अलङ्कारानेव स्वीकरोति। अलङ्कारा द्विविधाः शब्दालङ्कारा अर्थालङ्काराश्च। अनुप्रासोपमादीपकरूपकाख्याश्चत्वार एवालङ्कारा भरतेनोक्ताः त एवानुदिनं वर्धमानाः कुवलयानन्दे १२५ संख्यतां गताः। अलङ्काराणां लक्षणमपि तेषु तेषु ग्रन्थेषु भिद्यमानं प्राप्यते। अलङ्कारसम्प्रदायप्रवर्त्तका रसतत्त्वं जानाति स्म अत एव ते रसवदादिकानलङ्कारानुक्तवन्तः रसा अपि अलङ्कार एव न पृथक् तत्त्वान्तरमिति तेषामाशयः।

रीतिसम्प्रदायः

वामनेन प्रवृत्तः अयं सम्प्रदायः रीतिरात्मा काव्यस्येति स्थापयति। विशिष्टापदरचनैव रीतिरिति कथ्यते।
रीतिः गुणानाश्रित्य तिष्ठतीत्यतः गुणसम्प्रदाय इत्यपि सम्प्रदायोयं कीर्त्यते। दण्डिना रीतिभेदानां व्यवस्थितं वर्णनं कृतम्।

वक्रोक्तिसम्प्रदायः

कुन्दकेन प्रवृत्तः अयं सम्प्रदायः वक्रोक्तिः काव्यजीवितं इति वदति। वक्रोक्तिः वैचित्र्यभङ्गीभणितिरुच्यते।सा च षट्विधा १ वर्णविन्यासवक्रता २ पदपूर्वार्द्धवक्रता ३ परार्द्धवक्रता ४ वाक्यवक्रता ५ प्रकरणवक्रता ६ प्रबन्धवक्रता च इति।

ध्वनिसम्प्रदायः

काव्यस्यात्मा ध्वनिरिति अनन्दवर्धनेन ध्वन्यलोके ध्वनिसम्प्रदायस्य स्थापना कृता।

यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ
व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः।

इत्येव ध्वनेः लक्षणं तत्र उक्तं। आनन्दवर्धनः पूर्विकाणां ध्वनिविरोधिनां मतान् ध्वनिस्वरूपं तत्भेदाश्च निरूपयति। अभिनवगुप्तरचितं लोचनं ध्वन्यालोकस्य पठने अत्यन्तोपकारी व्याख्या वर्त्तते।

औचित्यसम्प्रदायः

अनौचित्यादृते नान्यद्रसभङ्गस्य कारणम् इति आनन्दवर्धनस्य उक्तिमाश्रित्य क्षेमेद्रेण प्रवर्त्तितः। तदीयः ग्रन्थः औचित्यविचारचर्चा।

♦♦♦♦♦♦♦

MODULE II
KAVYALANKARA OF BHAMAHA CHAPTER -1

भामहः तदीयः काव्यालङ्कारश्च।

भामहः काश्मीरवासी रक्रिलगोमिनः पुत्रश्चासीत्। गोमिन् पदं बौद्धेषु प्रयुज्यते। भामहस्य समयः क इति विषये महान् मतभेदो विद्यते। अधुना दण्डी भामहात्परवर्त्ती स्वीकृत एव अतो यदि दण्डी सप्तमशतकप्रारम्भकालिकस्तदाऽयम् षष्ठशतकवर्त्तीति वक्तव्यम्। अष्टमशतकोत्पन्नः भट्टोद्भटः भामहकृतं काव्यालङ्कारं व्याख्यातवान् अतोऽयं तत्पूर्वकालिक इत्यपि पूर्वोक्तमते अनुकूलम्। भामहेन विरचितः काव्यलङ्कारनामा एक एव ग्रन्थः प्राप्यते। काव्यालङ्कारे षट् परिच्छेदाः। प्रथमे परिच्छेदे काव्यसाधनतल्लक्षणतद्भेदा वर्णिताः। द्वितीये तृतीये चालङ्कारा विवेचिताः। चतुर्थे भरतोक्ता दश दोषाः प्रपञ्चिताः। पञ्चमे न्यायविरोधिदोषो मीमांसितः। षष्ठे विवादास्पदपदशुद्धिर्विचारिता।

काव्यालङ्कारः प्रथमः परिच्छेदः

मनसा गिरा प्रयत्नेन च सार्वभौमं ईश्वरं प्रणम्य स्वकीयस्य ग्रन्थस्य आरम्भः भामहेन क्रियते।

प्रणम्य सार्वं सर्वज्ञं मनोवाक्कायकर्मभिः।

काव्यलङ्कार इत्येष यथाबुद्धि विधास्यते॥

काव्यप्रयोजननिरूपणं-

साधुकाव्यानां रचना तु धर्मार्थकाममोक्षरूपाणां पुरुषार्थानां ज्ञानं कलानैपुणीं मनःप्रसादं च जनयति। तत् कवेः धवलां कीर्तिं उत्घोषयति च।

धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च।

प्रीतिं करोति कीर्तिं च साधुकाव्यनिबन्धनम्॥

अस्मिन् संसारे कवित्वं भग्ययुक्तानामेव जायते। अकवेः शास्त्रवेदनं धनहीनस्य दातृत्वमिव भीरोः शस्त्रपाटवमिव च व्यर्थं परिहास्यं च भवति।

अधनस्येव दातृत्वं क्लीबस्येवास्त्रकौशलम्।

अज्ञस्येव प्रगल्भत्वमकवेः शास्त्रवेदनम्।

सत्कवित्वेन रहिता वग्विदग्धता विनयेन रहिता श्रीः इव शशिना रहिता निशा इव च कुत्सिता भवति।

विनयेन विना का श्रीः का निशा शशिना विना।
रहिता सत्कवित्वेन कीदृशी वग्विदग्धता॥

कस्यापि पण्डितस्य गुरोः साहाय्येन शास्त्राण्यध्येतुं मूढाः अपि शक्नुवन्ति। किन्तु कवित्वशक्तिस्तु कस्यचित् प्रतिभायुक्तस्य एव जायते।

गुरूपदेशादध्येतुं शास्त्रं जडधियोप्यलम्।
काव्यं तु जायते जातु कस्यचित्प्रतिभावतः॥

दिवंगतानामपि महाकवीनां काव्यरूपं शरीरं अनश्वरं प्रतिभाति। अस्य काव्यस्य कीर्तिः यावत् तिष्ठति तावत् कविरपि पण्डितैः श्लाघ्यते। काव्यरचनया कविः प्रलयान्तां कीर्तिमाप्नोति। इत्यतः काव्यलक्षणविधानं अवधानं च परमप्रधानं।

काव्यस्य कारणं किं इत्यस्योत्तररूपेण एवमुच्यते-

शब्दश्छन्दोऽभिधानार्था इतिहासाश्रयाः कथाः।
लोको युक्तिः कलाश्चेति मन्तव्याः काव्यहेतवः।

शब्दस्वरूपज्ञानावबोधकं शास्त्रं व्याकरणं वृत्तशास्त्रं शब्दार्थज्ञानं इतिहासादिप्रसिद्धाः कथाः लौकिकाः युक्तयः कलाश्च काव्यस्य कारणानि एव। वागर्थान् विदित्वा तत्ज्ञानां ग्रन्थान् पठित्वा तेषां अनुग्रहेण काव्यरचना कार्या। काव्यस्य रचना अवधानतया कार्या यतः दुष्टं एकं पदमपि दुःसुतवद् दुष्कीर्तिं जनयति।

नाकवित्वमधर्माय व्याधये दण्डनाय वा।
कुकवित्वं पुनःसाक्षात्मृतिमाहुर्मनीषिणः॥

अकवित्वं किमपि दोषं न उत्पादयति। किन्तु कुकवित्वं मरणतुल्यमिति पण्डिताः वदन्ति।


काव्यालङ्कारस्य प्रथमे परिच्छेदे भामहः काव्यस्य माहात्म्यं काव्यभेदान् काव्यदोषान् च विवृणोति।

काव्यलक्षणं-


भामहेन स्वीकृतं काव्यलक्षणमस्ति शब्दार्थौ सहितौ काव्यम्। इति तत् च काव्यं रचनाशैलिं भाषां इतिवृत्तं रचनास्वरूपं च आधारीकृत्य पुनः विभज्यते।

काव्यभेदाः-

१ रचनाशैलिमाधारिकृत्य काव्यं गद्यं पद्यं च इति द्विधा विभज्यते।




२ कस्यां भाषायां काव्यस्य रचना भवति इति अनुसृत्य संस्कृतं प्राकृतं अपभ्रंश इति त्रिधा विभज्यते।



३ इतिवृत्तस्य स्वभावं आधारीकृत्य काव्यं पुराणकथाः उत्पाद्यकथाः कलाश्रयकथाः शास्त्राश्रयकथाः इति चतुर्धा विभज्यते।

वृत्तदेवादिचरितशंसि चोत्पाद्यवस्तु च।


कलाशास्त्राश्रयं चेति चतुर्धा भिद्यते पुनः।



४ रचनायाः स्वरूपं आधारीकृत्य काव्यं पञ्चधा विभज्यते।

सर्गबन्धोभिनेयार्थं तथैवाख्यायिकाकथे।

अनिबद्धं च काव्यादि तत्पुनः पञ्चधोच्यते॥



महाकाव्यलक्षणम्-

भामहः महाकाव्यलक्षणमेवं ददाति-

सर्गबन्धो महाकाव्यं महतां च महत् च यत्।
अग्राम्यशब्दमर्थ्यं च सालङ्कारं सदाश्रयम्।
मन्त्रदूतप्रयाणाजिनायकाभ्युदयैश्च यत्।
पञ्चभिः सन्धिभिर्युक्तं नातिव्याख्येयमृद्धिमत्।
चतुर्वर्गाभिधानेऽपि भूयसार्थोपदेशकृत्।
युक्तं लोकस्वभावेन रसैश्च सकलैः पृथक्।
नायकं प्रागुपन्यस्य वंशवीर्यश्रुतादिभिः।
न तस्यैव वधं ब्रूयदन्योत्कर्षाभिधित्सया॥

महाकाव्यं तु सर्गबन्धः इति च कीर्त्यते। तत्र विभागाः सर्गाः इति कीर्त्यन्ते। महतां काव्यं अस्ति इत्यतः महत् काव्यं अस्ति इत्यतश्च महाकाव्यमिति संज्ञा सार्था। तस्मिन् शोभनः शब्दः शोभनः अर्थः च प्रतिपाद्येते। अलङ्कारानां सान्निध्यं सज्जनाश्रयत्वं च तस्य स्वभावः एव। तस्मिन् मन्त्रदूतप्रयाणानि अजि नायकाभ्युदयादयश्च वर्ण्यन्ते। मुख-प्रतिमुख-गर्भ-अवमर्श-उपसंहृतिरूपैः सन्धिभिः सहितं महाकाव्यं

अतिव्याख्येयं न भवेत्। काव्यस्यान्ते नायकस्य विजयः भवेत् एवमेव सहृदयस्यापि वृद्धिः तस्य पठनेन भवेत्। धर्म-अर्थ-काम-मोक्षरूपाणां चतुर्वर्गाणां प्रतिपादनं सामान्यतया तत्र कार्यं किन्तु विशेषतया अर्थस्यैव उपदेशः कार्यः। तत् काव्यं लोकस्वभावस्य सूचकं स्यात्। तस्मिन् शृङ्गारहास्यरौद्रवीरभयानकशान्तरूपाः नवरसाः अपि सन्निहिताः स्युः। नायकस्य वंशवीर्यश्रुतादि वर्णनं कृत्वा प्रतिनायकेन कृतं नायकवधं न प्रतिपादयेत्। यदि कश्चनपात्रं काव्यव्यापितया न स्वीक्रियते तर्हि तस्य काव्यस्य आदौ ग्रहणं न कार्यं।

नाटकलक्षणं-

द्विपदी शम्या रासकं स्कन्धक प्रभृतीनि नाटकानि स्वीक्रियन्ते। तदेव अभिनेयार्थमिति उच्यते।

आख्यायिकालक्षणं-

प्रकृतानाकुलश्रव्यशब्दार्थपदवृत्तिना
गद्येन युक्तोदात्तार्था सोच्छ्वासाख्यायिका मता।
वृत्तमाख्यायते तस्यां नायकेन स्वचेष्टितम्।
वक्त्रं चापरवक्त्रं च काले भाव्यर्थशंसि च।
कवेरभिप्रायकृतैः कथनैः कैश्चिदङ्किता।
कन्याहरणसंग्रामविप्रलम्भोदयान्विता।
न वक्त्रापरवक्त्राभ्यां युक्ता नोच्छ्वासवत्यः॥

सन्दर्भानुगुणैः शब्दैः अर्थैः च सहिता शोभनार्था उच्छ्वासनामकैः विभागैः सहिता गद्यरचना भवति आख्यायिका। तस्यां नायकेन स्वकीया कथा वर्ण्यते। वक्त्र-अपरवक्त्रनामकौ वृत्तौ तत्र भवतः। आगमिनां अर्थानाम् सूचना तत्र भवति। मध्ये कवेरभिप्रायस्य सूचनाः च तत्र दृश्यन्ते। कन्याहरणं युद्धं विरहः नायकविजयश्च तत्र वर्ण्यन्ते। यदि वक्त्रापरवक्त्रवृत्तयोः उच्छ्वासनामकविभागस्य च अभावः तस्यां दृश्यते तथापि सा आख्यायिका एव।

कथालक्षणं-

कथालक्षणं भामहेन एवं दीयते-

न वक्त्रापरवक्त्राभ्यां युक्ता नोच्छ्वासवत्यपि।

संस्कृते संस्कृता चेष्टा कथाऽपभ्रंशभाक्तथा।

अन्यैः स्वचरितं तस्यां नायकेन तु नोच्यते।

स्वगुणाविष्कृतिं कुर्यादभिजातः कथं जनः।

कथायां वक्त्रापरवक्त्रवृत्तयोः प्रयोगः न दृश्यते। एवमेव तस्याः विभागाः उच्छ्वासनामकाः न भवन्ति। संस्कृतभाषायां रचिता अपि कदाचित् अपभ्रंशस्य सान्निध्यः अपि दृश्यते। तत्र नायकादन्यः कोऽपि नायकचरितं वर्णयति। यतः कुलीनः कोऽपि पुरुषः स्वगुणकथने तत्परः न स्यात्।

अनिबन्धं काव्यं-

गाथाः मुक्तकश्लोकाः च अनिबन्धकाव्ये अन्तर्भवन्ति।

सर्वेपि एते काव्यभेदाः वक्रस्वभावोक्त्या युक्ताः नितरां स्वीक्रियन्ते सहृदयैः।

रीतिसम्प्रदायस्य निरूपणं

दण्दिना स्वीकृतस्य रीतिसम्प्रदायस्य निरूपणं कर्तुम् प्रवृत्तः भामहः वैदर्भगौडीयौ गतानुगतिकन्यायात् अमेधसां नानाख्या एव इति वदति। यदि केचन अश्मकवंशादि वैदर्भमिति स्वीकुर्वन्ति चेत् तत्र दोषोपि नास्ति यतः संज्ञा इच्छातः एव विधीयते। यद् काव्यं अपुष्टार्थं वक्रोक्तिहीनं प्रसन्नं ऋजु कोमलं च दृश्यते तत् केवलं श्रुतिपेशलं गेयमित्येव कीर्तितुं योग्यं। गौडीयसंज्ञायुक्ताः अपि यदि अलङ्कारयुक्ताः दोषरहिताः सदर्थयुक्ताः न्याय्याः अनाकुलाश्च् भवन्ति चेत् साधीयः एव। गिरां चारुता तु नितान्तादिमात्रेण न जायते अपि तु वाचां वक्राभिधेयशब्दोक्ति एव इष्टा अलङ्कृतिः।

काव्यदोषाण् एवं निरूपयति-

नेयार्थं क्लिष्टमन्यार्थमवाचकमयुक्तिमत्

गूढशब्दाभिधानञ्च कवयो न प्रयुञ्जते।

अत्र षण्णां काव्यदोषाणां निरूपणं क्रियते।

१ नेयार्थरूपो दोषो वर्ण्यते- यस्य शब्दन्यायानुपारूढः युक्तः अर्थः कृतिभिः स्वाभिसन्धिना बलात् कथञ्चित् नीयते तत् नेयार्थरूपो दोषः।

उदा- मायेव भद्रा इति प्रकल्पना तु असाध्वी एव। वेणुदाकेः माया इति यावत् न सूचयति तावत् तस्य अर्थस्य प्राप्तिरेव न भवतीति नेयार्थात्मकदोषस्योदाहरणमिदं भवति।

२ क्लिष्टाख्यस्य दोषस्य स्वरूपमाह-

व्यवहितं अर्थं क्लिष्टं।

३ अन्यार्थरूपदोषस्य स्वरूपमाह-

विजह्रुस्तस्य ताः शोकं क्रीडायां विकृतञ्च तत्। इति उदाहरणे कस्यापि शोकस्य निवारणं कथमभवदिति वर्णयति। किन्तु वाचां साहित्येन अन्यं अर्थं अपि द्योतयतीति अन्यार्थरूपः दोषः।

४ अवाचकरूपदोषस्य स्वरूपमाह- वाच्ये अर्थे साक्षात् अरूढं अवाचकं अर्थव्यक्तिम् न जनयति।

उदा- हिमापहामित्रधरैः व्याप्तम् व्योम। अत्र मेघैः व्याप्तं गगनमिति अर्थः दुर्ग्रहः एव।

५ अयुक्तिमदिति दोषस्य स्वरूपमाह-

सन्देशकाव्येषु वायुम् चन्द्रं भ्रमरान् हारीतान् चक्रवाकान् शुकान् मेघान् च सन्देशहरान् विदधाति। तन्न युक्तिसहमित्यतः अयुक्तिमन्नामकस्य दोषस्य उदाहरणं जायते।

अत्र कविः सन्देशकाव्यानां रचना विषये विद्यमानां विप्रतिपत्तिं सूचयति। पूर्वप्रतिपादिताः अवाचः अव्यक्तवाचश्च भवन्ति इत्यतः दूरदेशं गत्वा दूत्यं कथमपि समर्पयितुं न अर्हन्ति। कालिदासादयः पण्डिताः तु

धूमज्योतिस्सलिलमरुतां सन्निपातः क्व मेघः
सन्देशार्थाः क्व पटुभिः प्राणिभिः प्रापणीयाः।
इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे
कामार्थाहि प्रकृतिकृपणाः चेतनाचेतनेषु।

इति सयुक्तिं स्वरचनां स्थापयन्ति इत्यतः तत्र विवादस्य अवसरो न प्राप्यते।

६ गूढशब्दाभिधानरूपस्य दोषस्य स्वरूपमुच्यते-

गूढशब्दाभिधानः पण्डितैरपि अस्वीकार्य एव ।

उदा- असितार्तितुगद्रिच्छित्स्वःक्षितां पतिरद्विदृक् ।

अमिद्धिः शुभ्रदृग्दृष्टैर्द्विषो जेघ्नीयिषीष्ट वः ।

अत्र कृता सुब्रह्मण्यस्तुतिः गूढशब्दाभिधाना इत्यतः पण्डितैरपि उत्तमकाव्यत्वेन न स्वीक्रियते ।

अर्थदोषानुक्त्वा शब्ददोषान् वक्तुमारभते-

श्रुतिदुष्टार्थदुष्टे च कल्पनादुष्टमित्यपि ।

श्रुतिकष्टं तथैवाहुर्वाचां दोषं चतुर्विधम् ।

एवम् श्रुतिदुष्टं अर्थदुष्टं कल्पनादुष्टं श्रुतिकष्टं इति वाचां चतुर्विधं दोषं पण्डिताः वदन्ति ।

१ श्रुतिदुष्टाः गिरः-

विड्वार्चोविष्ठितक्लिन्नच्छिन्नवान्तप्रवृत्तयः ।

प्रचारधर्षोतोद्गारविसर्गहृदयन्त्रिताः ।

हिरण्यरेताः सम्बाधः पेलवोपस्थिताण्डजाः ।

वाक्काटवादयश्चेति श्रुतिदुष्टाः मताः गिरः ।एतेषां प्रयोगः असभ्यः इत्यतः त्याज्यः ।

२ अर्थदुष्टस्य स्वरूमचुच्यते-

यत्र अर्थान्तरे प्रवृत्तमपि वाक्यं प्रयुक्तानां शब्दानां स्वभावत् असभ्यवस्तुनः प्रतीतिं जनयति तत्र अर्थदुष्टं ।

उदा- हन्तुमेव प्रवृत्तस्य स्तब्धस्य विवरैषिणः ।

पतनं जायतेऽवश्यं कृच्छ्रेण पुनरुन्नतिः ।

अत्र युद्धे परजितस्य विजयप्रतीक्षा अस्तीति वदति । किन्तु वाचां सामर्थ्यात् सम्भोगरूपः अर्थः अपि व्यज्यते इत्यतः अर्थदुष्टस्य उदाहरणं ।

३ कल्पनादुष्टमाह-

पदद्वयस्य सन्धाने यदनिष्टं प्रकल्पते ।

तदाहुः कल्पनादुष्टं स शौर्याभरणो यथा ॥ पदसन्धाने सति असभ्यद्योतकं भवति कल्पनादुष्टम् ।

४ श्रुतिकष्टं-

यथाजिह्वददित्यादिषु सभ्यमप्यर्थं वाचां श्रवणमात्राद् असभ्यो प्रतिभाति। दोषोऽयं श्रुतिकष्टमित्युच्यते। काव्यदोषविषये स्वकीयं मतं संक्षिपन् एवम् वदति- कदाचित् दुरुक्तमपि सन्निवेशविशेषात् स्रजां अन्तराले आबद्धं नीलं पलाशमिव शोभते। कदाचित् असाधु अपि वाक्यं आश्रयसौन्दर्यात् कान्ताविलोचनन्यस्तं मलीमसं अञ्जनमिव शोभां धत्ते। आपाण्डुगण्डमेतत्ते वदनं वनजेक्षणे। इत्यत्र पाण्डुशब्दस्य सान्निध्यात् असभ्योऽपि गण्डशब्दः साधु प्रतीयते। एवमेव विक्लिन्नगण्डानां करिणां मदवारिभिः इत्यत्र अपि।

एतद् ग्राह्यं सुरभि कुसुमं ग्राम्यमेतन्निधेयं
धत्ते शोभां विरचितमिदं स्थानमस्यैतदस्य।
मालाकारो रचयति यथा साधु विज्ञाय मालां
योज्यं काव्येष्ववहितधिया तद्वदेवाभिधानम्।

यथा कश्चित् मालाकारः तदर्थमानीतेषु पुष्पेषु एतत् ग्राह्यं एतन्न ग्राह्यमिति विचिन्त्य मालां रचयति तथैव काविना त्यज्ज्यग्राह्यविवेकेन पदानि स्वीकार्याणि।

♦♦♦♦♦♦♦

KAVYALANKARA CHAPTER 1- TEXT

आचार्यभामहप्रणीतः

काव्यालंकारः

प्रथमः परिच्छेदः

प्रणम्य सार्वं सर्वज्ञं मनोवाक्कायकर्मभिः।
काव्यालङ्कार इत्येष यथाबुद्धि विधास्यते॥१॥

धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च।
प्रीतिं करोति कीर्तिं च साधुकाव्यनिबन्धनम्॥२॥

अधनस्येव दातृत्वं क्लीबस्येवास्त्रकौशलम्।
अज्ञस्येव प्रगल्भत्वमकवेः शास्त्रवेदनम्॥३॥

विनयेन विना का श्रीः का निशा शशिना विना।
रहिता सत्कवित्वेन कीदृशी वाग्विदग्धता॥४॥

गुरूपदेशादध्येतुं शास्त्रं जडधियोऽप्यलम्।
काव्यं तु जायते जातु कस्यचित्प्रतिभावतः॥५॥

उपेयुषामपि दिवं सन्निबन्धविधायिनाम्।
आस्त एवं निरातङ्कं कान्तं काव्यमयं वपुः॥६॥

रुणद्धि रोदसी चास्य यावत्कीर्तिरनश्वरी।
तावत्किलायमध्यास्ते सुकृती वैबुधं पदम्॥७॥

अतोऽभिवाञ्छता कीर्तिं स्थेयसीमा भुवः स्थितेः।
यत्नो विदितवेद्येन विधेयः काव्यलक्षणः॥८॥

शब्दश्छन्दोऽभिधानार्था इतिहासाश्रयाः कथाः।
लोको युक्तिः कलाश्चेति मन्तव्याः काव्यहेतवः॥९॥

शब्दाभिधेये विज्ञाय कृत्वा तद्विदुपासनाम्।
विलोक्यान्यनिबन्धांश्च कार्यः काव्यक्रियादरः॥१०॥

सर्वथा पदमप्येकं न निगाद्यमवद्यवत्।
विलक्ष्मणा हि काव्येन दुःसुतेनेव निन्द्यते॥११॥

नाकवित्वमधर्माय व्याधये दण्डनाय वा।
कुकवित्वं पुनः साक्षन्मृतिमाहुर्मनीषिणः॥१२॥

रूपकादिरलंकारस्तस्यान्यैर्बहुधोदितः।
न कान्तमपि निर्भूषं विभाति वनितानननम्॥१३॥

रूपकादिमलंकारं बाह्यमाचक्षते परे।
सुपां तिङां च व्युत्पत्तिं वाचां वाञ्छन्त्यलङ्कृतिम्॥१४॥

तदेतदाहुः सौशब्द्यं नार्थव्युत्पत्तिरीदृशी।
शब्दाभिधेयालङ्कारभेदादिष्टं द्वयं तु नः॥१५॥

शब्दार्थौ सहितौ काव्यं गद्यं पद्यञ्च तद् द्विधा।
संस्कृतं प्राकृतञ्चान्यदपभ्रंश इति त्रिधा॥१६॥

वृत्तं देवादिचरितशंसि चोत्पाद्यवस्तु च।
कलाशास्त्राश्रयञ्चेति चतुर्धा भिद्यते पुनः॥१७॥

सर्गबन्धोऽभिनेयार्थं तथैवाख्यायिकाकथे।
अनिबद्धञ्च काव्यादि तत्पुनः पञ्चधोच्यते॥१८॥

सर्गबन्धो महाकाव्यं महताञ्च महच्च यत्।
अग्राम्यशब्दमर्थ्यञ्च सालंकारं सदाश्रयम्॥१९॥

मन्त्रदूतप्रयाणाजिनायकाभ्युदयैश्च यत्
पञ्चभिः सन्धिभिर्युक्तं नातिव्याख्येयमृद्धिमत्॥२०॥

चतुर्वर्गाभिधानेऽपि भूयसार्थोपदेशकृत्।
युक्तं लोकस्वभावेन रसैश्च सकलैः पृथक्॥२१॥

नायकं प्रागुपन्यस्य वंशवीर्यश्रुतादिभिः।
न तस्यैव वधं ब्रूयादन्योत्कर्षाभिधित्सया॥२२॥

यदि काव्यशरीरस्य न स व्यापितयेष्यते।
न चाभ्युदयभाक्तस्य मुधादौ ग्रहणं स्तवे॥२३॥

नाटकं द्विपदीशम्यारासकस्कन्धकादि यत्।
उक्तं तदभिनेयार्थमुक्तोऽन्यैस्तस्य विस्तरः॥२४॥

संस्कृतानाकुलश्रव्यशब्दार्थपदवृत्तिना।
गद्येन युक्तोदात्तार्था सोच्छ्वासाख्यायिका मता॥२५॥

वृत्तमाख्यायते तस्यां नायकेन स्वचेष्टितम्
वक्त्रञ्चापरवक्त्रञ्च काले भाव्यर्थशंसि च॥२६॥

कवेरभिप्रायकृतैः कथनैः कैश्चिदङ्किता।
कन्याहरणसङ्ग्रामविप्रलम्भोदयान्विता॥२७॥

न वक्त्रापरवक्त्राभ्यां युक्ता नोच्छ्वासवत्यपि।
संस्कृताऽसंस्कृता चेष्टा कथापभ्रंशभाक्तथा॥२८॥

अन्यैः स्वचरितं तस्यां नायकेन तु नोच्यते।
स्वगुणाविष्कृतिं कुर्यादभिजातः कथं जनः॥२९॥

अनिबद्धं पुनर्गाथाश्लोकमात्रादि तत्पुनः।
युक्तं वक्रस्वभावोक्त्या सर्वमेवैतदिष्यते॥३०॥

वैदर्भमन्यदस्तीति मन्यन्ते सुधियोऽपरे।
तदेव च किल ज्यायः सदर्थमपि नापरम्॥३१॥

गौडीयमिदमेतत्तु वैदर्भमिति किं पृथक्।
गतानुगतिकन्यायान्नानाख्येयममेधसाम्॥३२॥

ननु चाश्मकवंशादि वैदर्भमिति कथ्यते।

कामं तथास्तु प्रायेण संज्ञेच्छातो विधीयते॥३३।

अपुष्टार्थमवक्रोक्ति प्रसन्नमृजु कोमलम्।
भिन्नं गेयमिवेदं तु केवलं श्रुतिपेशलम्॥३४॥

अलंकारवदग्राम्यमर्थ्यं न्याय्यमनाकुलम्।
गौडीयमपि साधीयो वैदर्भमिति नान्यथा॥३५॥

न नितान्तादिमात्रेण जायते चारुता गिराम्।
वक्राभिधेयशब्दोक्तिरिष्टा वाचामलङ्कृतिः॥३६॥

नेयार्थं क्लिष्टमन्यार्थमवाचकमयुक्तिमत्
गूढशब्दाभिधानञ्च कवयो न प्रयुञ्जते॥३७॥

नेयार्थं नीयते युक्तो यस्यार्थः कृतिभिर्बलात्।
शब्दन्यायानुपारूढः कथञ्चित्स्वाभिसन्धिना॥३८॥

मायेव भद्रेति यथा सा चासाध्वी प्रकल्पना।
वेणुदाकेरिति च तां न यन्ति वचनाद् विना॥३९॥

क्लिष्टं व्यवहितं विद्यादन्यार्थं विगमे यथा।
विजह्रुस्तस्य ताः शोकं क्रीडायां विकृतञ्च तत्॥४०॥

हिमापहामित्रधरैर्व्याप्तं व्योमेत्यवाचकम्।
साक्षादरूढं वाच्येऽर्थे नाभिधानं प्रतीयते॥४१॥

अयुक्तिमद् यथा दूता जलभृन्मारुतेन्दवः।
तथा भ्रमरहारीतचक्रवाकशुकादयः॥४२॥

अवाचोऽव्यक्तवाचश्च दूरदेशविचारिणः।
कथं दूत्यं प्रपद्येरन्निति युक्त्या न युज्यते॥४३॥

यदि चोत्कण्ठया यत्तदुन्मत्त इव भाषते।
तथा भवतु भूम्नेदं सुमेधोभिः प्रयुज्यते॥४४॥

गूढशब्दाभिधानञ्च न प्रयोज्यं कथञ्चन।
सुधियामपि नैवेदमुपकाराय कल्पते॥४५॥

असितर्तितुगद्रिच्छित्स्वःक्षितां पतिरद्विदृक्।
अमिद्धिः शुभ्रदृग्दृष्टैर्द्विषो जेघ्नीयिषीष्ट वः॥४६॥

श्रुतिदुष्टार्थदुष्टे च कल्पनादुष्टमित्यपि।
श्रुतिकष्टं तथैवाहुर्वाचां दोषं चतुर्विधम्॥४७॥

विड्वर्चोविष्ठितक्लिन्नच्छिन्नवान्तप्रवृत्तयः।
प्रचारधर्षितोद्गारविसर्गहृदयन्त्रिताः॥४८॥

हिरण्यरेताः सम्बाधः पेलवोपस्थिताण्डजाः।
वाक्काटवादयश्चेति श्रुतिदुष्टा मताः गिरः॥४६॥

अर्थदुष्टं पुनर्ज्ञेयं यत्रोक्ते जायते मतिः।
असभ्यवस्तुविषया शब्दैस्तद्वाचिभिर्यथा॥५०॥

हन्तुमेव प्रवृत्तस्य स्तब्धस्य विवरैषिणः।
पतनं जायतेऽवश्यं कृच्छ्रेण पुनरुन्नतिः॥५१॥

पदद्वयस्य सन्धाने यदनिष्टं प्रकल्पते।
तदाहुः कल्पनादुष्टं स शौर्याभरणो यथा॥५२॥

यथाजिह्मददित्यादि श्रुतिकष्टञ्च तद्विदुः।
न तदिच्छन्ति कृतिनो गण्डमप्यपरे किल॥५३।

सन्निवेशविशेषात्तु दुरुक्तमपि शोभते।
नीलं पलाशमाबद्धमन्तराले स्रजामिव॥५४॥

किञ्चिदाश्रयसौन्दर्याद्धत्ते शोभामसाध्वपि।
कान्ताविलोचनन्यस्तं मलीमसमिवाञ्जनम्॥५५॥

आपाण्डुगण्डमेतत्ते वदनं वनजेक्षणे।

संगमात्पाण्डुशब्दस्य गण्डः साधु यथोदितः॥५६॥

अनयान्यदपि ज्ञेयं दिशा युक्तमसाध्वपि।
यथा विक्लिन्नगण्डानां करिणां मदवारिभिः॥५७॥

मदक्लिन्नकपोलानां द्विरदानां चतुश्शती।
यथा तद्वदसाधीयः साधीयश्च प्रयोजयेत्॥५८॥

एतद् ग्राह्यं सुरभि कुसुमं ग्राम्यमेतन्निधेयं
धत्ते शोभां विरचितमिदं स्थानमस्यैतदस्य।
मालाकारो रचयति यथा साधु विज्ञाय मालां
योज्यं काव्येष्ववहितधिया तद्वदेवाभिधानम्॥५९॥

॥ इति प्रथमः परिच्छेदः॥

♦♦♦♦♦♦♦

MODULE- 3
KAVYADARSA OF DANDI CHAPTER -1

मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते इति उक्तिमनुसृत्य दण्दिना काव्यादर्शस्यारम्भः सरस्वतीं स्तुत्वा कृतः।

चतुर्मुखमुखाम्भोजवनहंसवधूर्मम।
मानसे रमतां नित्यं सर्वशुक्ला सरस्वती॥

यथा हंसी कमलवने विहरति तथा ब्रह्मणो मुखेषु स्वच्छन्दविहारिणी इयं वाणी अस्माकं मनसि चिरप्रतिष्ठिता भवेदिति आशयः।पूर्वसूरिभिः कृतानि लक्षणग्रन्थानि संक्षिप्य लक्ष्यग्रन्थानि आलोच्य च मया काव्यलक्षणं विहितम्। अनेन ग्रन्थस्यास्य अनुबन्धचतुष्टयं सम्यक् निरूपितं।

प्रतिपाद्यं- काव्यस्वरूपं

अधिकारी- काव्यस्वरूपजिज्ञासुः।

प्रयोजनं- काव्यस्वरूपवुत्पत्तिः।

सम्बन्धः- प्रतिपाद्यप्रतिपादकभावः।

काव्यस्वरूपं वर्णितुमारब्धः दण्डी प्रथमं तावद् शब्दस्य प्राधान्यं प्रतिपादयति।

वाचां प्राध्यान्यं-संसारे त्रिविधा वाच उपलभ्यन्ते- संस्कृतः। प्राकृताः देश्यश्च। तत्र संस्कृताः पाणिन्यादिभिरनुशिष्टाः। प्राकृताः वररुचिना कृतानुशासनाः। शिष्टा देशी वाक्। त्रिविधानामप्येषां साहाय्येन एव उत्तममध्यमाधमाः जनाः स्वाभिप्रायं स्वेतरजनवेद्यं विधातुं शक्नुवन्ति।

इदमन्धंतमः कृत्स्नं जायेत भुवनत्रयम्।

यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते।

शब्दाभिधानस्य ज्योतिष एवायं महिमा यदयं लोको व्यवहारेषु न मुह्यति यदि शब्दा न स्युस्तदा लोकोऽयं व्यवहारं कर्त्तुं न पारयेत् तदधीनात्वात् सर्वव्यवहाराणां। यथा हि सूर्यादिज्योतिरभावे सर्वे पदार्थास्तमसा व्याप्ता लुप्ता इव भवन्ति तथैव शब्दाभिधज्योतेभावे तन्मात्रसम्पाद्यानां व्यवहाराणामनभ्युपायतया

लोकोऽयमन्ते तमसीव मग्नो विलुप्तसकलव्यवहारश्च जायेत। अत्र निदानरूपेण उच्यते- काव्यात्मकं दर्पणं प्राप्तं प्राचाम् राज्ञाम् यशोबिम्बं सदैव प्रतिबिम्बसृष्टिं करोति। बिम्बस्थानीये यशसि गतेऽपि काव्यदर्पणे तत्प्रतिबिम्बं भासमानमेव तिष्ठति। कविना न केवलं वाचां प्राधान्यं अपि तु तेषां निर्दोषताम् च आत्मसात् कार्यम्। यतः-

गोर्गौः कामदुधा सम्यक् प्रयुक्ता स्मर्यते बुधैः।

दुष्प्रयुक्ता पुनर्गोत्वं प्रयोक्तुः सैव शंसति॥

एकः शब्दः सम्यग् ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके च कामधुग् भवति इति महाभाष्ये सुप्रयोगस्य सर्वफलदत्वमुक्तम्। अत्र दुष्प्रयोगस्य फलमाह। स्वरवर्णमात्रादिवैगुण्येन उच्चारिताः शब्दाः वक्तुः कवेः च मूर्खभावं प्रथयति। तस्माद् काव्येषु दोषाणां स्वल्पानामपि परिहाराय यत्नः करणीयः। यथा सुन्दरमपि शरीरं एकेन श्वेतकुष्ठेन निन्दापात्रं जायेत तद्वत् स्वल्पेन दोषेण काव्यमेव निन्दापात्रं भवति। अतः सर्वथा तत्परिहाराय यतनीयं।यथा चक्षुरिन्द्रियविकलो जनो रूपभेदान् श्वेतपीतादीनवधारयितुमशक्तो भवति तद्वत् साहित्यशास्त्रज्ञानविधुरो जनो गुणदोषविभागाक्षमो भवति। अतः साहित्यशास्त्रज्ञानं सप्रयोजनं बोध्यम्। एतदर्थमेव पूर्वसूरयः विचित्रमार्गाणां वाचां क्रियाविधिं विरचयामासुः। तैः काव्यानां शरीरम् अलङ्काराः च दर्शिताः।

काव्यस्वरूपं-

शरीरम् तावदिष्टार्थव्यवच्छिन्ना पदावली।

काव्यस्य शरीरं किं इति विचिन्तने दण्डिना उक्तं यत्- अभिलषितार्थैर्युक्तानां पदानां समाहारः काव्यशरीरम् इति। काव्ये शब्दस्य अर्थस्य उभयस्य वा प्राधान्यमिति विषये आलङ्कारिकाणां मध्ये मतभेदो दृश्यते। आलङ्कारिकैः कृतानि काव्यलक्षणानि शब्दार्थयोरन्यतमस्य प्राधान्यविषये तेषां मतिरपि सूचयन्ति। तान् संक्षेपेण उच्यते-

भामहः- शब्दार्थौ सहितौ काव्यं गद्यं पद्यं च तद् द्विधा।

वामनः- काव्यशब्दोऽयं गुणालङ्कारसंस्कृत्ययोः शब्दार्थयोर्वर्तते

रुद्रटः- शब्दार्थौ काव्यम्।

मम्मटः- तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापि।

आनन्दवर्धनः- शब्दार्थशरीरं तावत्काव्यम्।

हेमचन्द्रः- अदोषौ सगुणौ प्रायः सलङ्कारौ च काव्यम्।

वाग्भटः शब्दार्थौ निर्दोषौ सगुणौ प्रायः सालङ्कारौ च काव्यम्।

विश्वनाथः- गुणालङ्कारसहितौ शब्दार्थौ दोषवर्जितौ काव्यम्।

विद्याधरः- शब्दार्थौ वपुरस्य तत्र विबुधैरात्माभ्यधायि ध्वनिः।

अग्निपुराणं- संक्षेपाद् वाक्यमिष्टार्थव्यवच्छिन्ना पदावली काव्यम्।

शौद्धोदनि- रसादिमद् वाक्यं काव्यम्।

विश्वनाथः- वाक्यं रसात्मकं काव्यं।


जगन्नाथपण्डितः- रमणीयार्थप्रतिपादकः शब्दः काव्यं।

जयदेवः- निर्दोषा लक्षणवती सरीतिर्गुणभूषिता

सालङ्काररसानेकवृत्तिर्वाक् काव्यनामभाक्।

माणिक्यचन्द्रः- काव्यं रसादिमद्वाक्यं श्रुतं सुखविशेषकृत्।काव्यलक्षणविधाने शब्दस्येव प्राध्यान्यं स्वीकुर्वन् दण्डी तदनुसारमेव काव्यलक्षणं विदधाति।

काव्यभेदाः- काव्यं तावद् गद्यं पद्यं मिश्रमिति त्रिधा विभज्यते।



तत्र पद्यं नाम चतुष्पदी। तच्च वृत्तं जातिः इति द्विधा विभज्यते। अक्षरसङ्घातं वृत्तम् मात्रासङ्घातं जातिः।छन्दोविचित्ति नामके ग्रन्थे छन्दश्शास्त्रसम्बन्धीनि सर्वाण्यपि विचाराणि प्रदर्शितानि। तत् ज्ञानं गभीरं काव्यसागरं तितीर्षूणां नौः।श्लोकसंख्यामाश्रित्य मुक्तकं कुलकं कोषः सङ्घातः इति अनेकाः पद्यभेदाः वर्तन्ते। ते सर्वे अपि सर्गबन्धस्य एकदेशिनः इत्यतः न विस्तरेण प्रतिपद्यन्ते। तथापि तेषां लक्षणमाह-

मुक्तकं- मुक्तकं श्लोक एवैकश्चमत्कारक्षमः सतां। यथा अमरुशतकादिः।

कुलकं- द्वाभ्यां तु युग्मकं।सन्दानितकं त्रिभिरिष्यते। कलापकं चतुर्भिश्च पञ्चभिः कुलकं मतम्।

कोषः- कोषः श्लोकसमूहस्तु स्यादन्योन्यानपेक्षकः। यथा- आर्यासप्तशत्यादिः।

सङ्घातः यत्र कविरेकमर्थं वृत्तेनैकेन वर्णयति काव्य सङ्घातः स निगदितः। यथा मेघदूतादिः।

महाकाव्यलक्षणं-

सर्गबन्धो महाकाव्यं उच्यते तस्य लक्षणम्।

आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्।

सर्गनामकाः अवान्तरविभागा एव महाकाव्यस्य व्यवच्छेदकाः। तस्य प्रारम्भस्तु आशीः- नमस्क्रिया- वस्तुनिर्देशेषु अन्यतमेन क्रियते।

आशीर्नाम स्वेष्टजनस्य स्वस्य वा शुभाशंसनम्।यथा शिवलीलार्णवे

पूतं स्वतः पूततरं ततो यद् गाङ्गम् पयः शङ्करमौलिसङ्गात्।

तत्पातु मातुः प्रणयापराधपादाहतैः पूततमं ततो नः।

नमस्क्रिया नाम मदपेक्षया त्वमुत्कृष्ट इति परोत्कर्षसूचनपूर्वकस्वापकर्षबोधनानुकूलो व्यापारविशेषः।

यथा रघुवंशे -वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये।

जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ॥

वस्तुनिर्देशः वर्णनीयकथाभागस्य प्रकारेण केनचिदुपनिबन्धः।

यथा कुमारसंभवे- अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः।

पूर्वापरौ तोयनिधी वगाह्य स्थितः पृथिव्या इव मानदण्डः॥

एतेषु अन्यतमेन मार्गेण महाकाव्यस्य आरम्भः कर्तुं शक्यते।

इतिहासकथोद्भूतमितरद्वा सदाश्रयम्।

चतुर्वर्गफलायत्तं चतुरोदात्तनायकम्।

अत्र इतिवृत्तं रामायणमहाभारताभ्यां इतिहासाभ्यां राजतरङ्गिण्यादि इतिहाससूचकेभ्यः ग्रन्थेभ्यः वा उद्धृतं अथवा सच्चरितानाश्रित्य विरचितं वा भवेत्। अत्र पूर्वस्योदाहरणं रघुवंशः कुमारसंभवश्च मध्यमस्य केरलोदयं उत्तरस्य तु बुद्धचरितम्। धर्मार्थकामकोक्षाणां प्राप्तिरेव महाकाव्यपठनस्य फलम्। अत्र व्यवहारकुशलः धीरोदात्तश्च नायकः भवेत्। नगरार्णवशैलर्त्तुचन्द्रार्कोदयवर्णनैः।

उद्यानसलिलक्रीडामधुपानरतोत्सवैः।

विप्रलम्भैर्विवाहैश्च कुमारोदयवर्णनैः।

मन्द्रदूतप्रयाणाजिनायकाभ्युदयैरपि ।

अलङ्कृतमसङ्क्षिप्तं रसभावनिरन्तरम् ।

सर्गैरनतिविस्तीर्णैः श्रव्यवृत्तैः सुसन्धिभिः ।

सर्वत्र भिन्नवृत्तान्तैरुपेतं लोकरञ्जकम् ।

काव्यं कल्पान्तरस्थायि जायते सदलङ्कृतिः ।

पुनश्च केषां विषयाणां वर्णना कार्या इति सूचयति ।

नायकाध्युषितस्य पुरस्य सागरस्य पर्वतस्य सूर्यचन्द्रोयास्तमनयोः उपवनस्य जलक्रीडायाः मद्यसेवनस्य शृङ्गारस्य विप्रलम्भशृङ्गारस्य विवाहस्य पुत्रोत्पत्तेः मन्त्रस्य दूतस्य विजययात्रायाः समराणां नायकविजयस्य च वर्णनया अलङ्कृतं विस्तारयुक्तं रसानां भावानां च नैरन्तर्ययुक्तं अनतिविस्तीर्णैः सर्गैः प्रसिद्धवृत्तैः सुव्यक्तसन्धिभिः युक्तं प्रतिसर्गं नूतनं जनहृदयाकर्षकं च काव्यं सद्भिरलङ्कारैर्युक्तं च सत् कल्पान्तरस्थायि जायते। पूर्वोक्तलक्षणेषु द्वित्राणां लोपे काव्यदोषो न भवति। तथापि यातच्छक्यं योज्यमित्येव अभिप्रायः। तत्कथं काव्यस्य प्रतिपादनमित्युच्यते। गुणान्वितं नायकं पूर्वं उपन्यस्य तेन कृतस्य शत्रुनाशस्य वर्णना इति मार्गः एव स्वभावसुन्दरं। यदि शत्रुं वंशवीर्यशास्त्रज्ञानादिभिः सहितं वर्णयित्वा तस्य जयेन नायकस्य उत्कर्षकथनं करोति तदपि श्लाघ्यमेव।

गद्यलक्षणं तद्भेदाश्च

पद्यस्वरूपप्रपञ्चनान्तरं गद्यलक्षणं तद्भेदान् च प्रतिपादयति।

अपादः पदसन्तानो गद्यं इति गद्यलक्षणं। तस्य च आख्यायिका कथा इति भेदद्वयं। तेषां मिथः भेदः अस्ति वा न वा इति विषये दण्डिनः भामहस्य च मिथः मतभेदो वर्तते। अत्र दण्डी तु तत् कथा-आख्यायिकेत्येका जातिः संज्ञाद्वयाङ्किता इति स्वमतं अधोलिखितैः वादैः साधयति।

आख्यायिका नायकेन स्वयं वाच्या कथा तदितरेण केनापि पुरुषेण वाच्या भवेदित्येव प्राचीनानां अभिप्रायः। स्वगुणाविष्कृतिं कुर्यादभिजातः कथं जनः इति तद्विषये वर्त्तमानस्य भामहमतस्य उत्तररूपेण वदति भूतार्थशंसिनः स्वगुणाविष्क्रियादोषो न भवति इत्यतः कथा अपि नायकेन स्वयं वाच्या स्याद् इति। आख्यायिका अपि नायकेनैव वाच्या इत्यपि वक्तुं न शक्नोति यतः अन्यो वक्ता स्वयं वेति कस्यापि

साहित्यरूपस्य भेदलक्षणं न भवितुमर्हति। आख्यायिकायां आर्त्यावृत्तस्य कथायां वक्रापरवक्रानामकानां वृत्तानां च प्रयोगः दृश्यते इति तान् व्यावर्तयन्तः प्राचीनाः वदन्ति। तन्न साधु यतः यदि कश्चित् कविः आख्यायिकायां वक्रापरवक्राणां कथायां आर्यायाः च प्रयोगः करोति नात्र दोषः। एवमेव प्राचीनैः आख्यायिकायां ऊच्छ्वासनामकाः कथायां लम्बकनामकाः च अध्यायाः दृश्यन्ते इति निरुपितम्। तदपि न साधु यतः कवेः तत्पर्यमनुसृत्य अध्यायानां नाम अपि परिवर्तितुं शक्यते तथापि वस्तुभेदो न भवति। द्वयोरपि कान्याहरण-संग्राम-विप्रलम्भोदयादीनां विषयाणां प्रतिपादनं यथा महाकाव्येषु तथा दृश्यते इत्यतः वर्णनीयविषयोऽपि व्यावर्त्तको न भवति।कविना कृतं चिह्नमपि माङ्गलार्थं कृतं बोध्यं न व्यावर्त्तकं। इत्थं कथा-आख्यायिकयोः मिथः संज्ञाभेदः एव न वस्तुभेदः जातिभेदो वा इति स्थापितम्।शेषाः आख्यानजातयोऽपि अत्रैव अन्तर्भवन्ति।

मिश्रकाव्यनिरूपणं-

गद्यपद्योभयात्मकानि मिश्राणि। तत्र नाटकाणि चम्पूकाव्यानि च अन्तर्भवति। नाटकलक्षणं नाट्यशास्त्रादौ विस्तरेण प्रतिपादितं। चम्पूलक्षणमुच्यते- गद्यपद्यमयी काचित् चम्पूरित्यभिधीयते।

उदा- भोजकृतं रामायणचम्पू।

भाषाभेदानाह

वाङ्मयं तावत् संस्कृतं प्राकृतं अपभ्रंशः मिश्रं इति चतुर्धा काव्यशास्त्रविशारदैः विभज्यते। संस्कृतं- महर्षिभिः व्याख्याता दैवी वाग्। तद्भवः तत्समो भवति देशीसंज्ञकानि प्राकृतानि।प्राकृतेषु अपि महाराष्ट्रदेशे प्रचलितं प्रकृष्टं प्राकृतमिति सूक्तिरत्नानां सागरः इति च उच्यते यतः प्रवरसेनकृतं सेतुबन्धप्रभृतीनि ग्रन्थानि अस्मिन् रचितानि। शौरसेनी गौडी लाटी इति सर्वाः भाषाः व्यवहारेषु प्राकृतसंज्ञकाः एव। काव्येषु गोपादीनां गिरः अपभ्रंशसंज्ञकाः दृश्यन्ते। व्याकरणादिषु शास्त्रेषु प्राकृतापभ्रंशविभागो नैव दृश्यते तत्र संस्कृतभिन्नमखिलम् अपभ्रंशशब्दप्रतिपाद्यम्।सर्गबन्धादीनां रचना संस्कृतभाषायां स्कन्धकादीनां रचना प्राकृतभाषायां ओसरादीनां रचना अपभ्रंशभाषायां च भवन्ति। नाटकानि तु पात्रभेदेन भाषाभेदं निरूपयन्ति इत्यतः संस्कृतप्राकृतापभ्रंशानां मिश्रकानि दृश्यन्ते। सर्वाभिः अपि संस्कृतप्राकृतापभ्रंशरूपाभिः भाषाभिः कथा निबध्यते। अद्भुतार्था बृहत्कथा भूतभाषामयी

(पैशाचीभाषा) एव। शृङ्गाररसप्रधानं नृत्यं लास्यं पुंनृत्यं छलितं पूर्वरङ्गान्तर्गतः वाद्यप्रयोगविशेषः शम्पा प्रभृतीनि दृश्यकाव्यानि। तदितराणि श्रव्यकाव्यानि च स्वीक्रियन्ते।

काव्यमार्गनिरूपणं-

अस्त्यनेको गिरां मार्गः सूक्ष्मभेदः परस्परं। इति काव्यमार्गनिरूपणे प्रवृत्तेन दण्डिना उच्यते। वाचां रचनाप्रकारः बहुविधः। तेषां मध्ये सूक्ष्मभेदोऽपि विद्यते। वामनेन रीतिरिति व्यवहृतः एव अत्र मार्गः इति व्यपदिश्यते। वामनस्तु रीतिरात्मा काव्यस्य। विशिष्टापदरचना रीतिः इति तत्स्वरूपं उक्तम्। सः वैदर्भी गौडी पाञ्चाली चेति तिस्रः रीतयः प्रपञ्चिताः। विश्वनाथेन रीतीणां चातुर्विध्यं स्वीक्रियते। लाटिका इति एकां अपि सः स्वीकरोति। भोजस्तु रीतीनां षाड्विधत्वमुक्तं। तत्र मागधी अवन्तिका एत्येते अपि अन्तर्भवतः।दण्डीतु स्फुटभेदयुक्तौ वैदर्भी गौडीयौ एव सविस्तरं प्रतिपादयति।

वैदर्भमार्गस्य प्राणभूताः अधोनिर्दिष्टाः गुणा। तेषां विपर्यये गौडमार्गोऽयमिति अनयोः भेदकल्पना।

श्लेषः प्रसादः समता माधुर्यं सुकुमारता।
अर्थव्यक्तिरुदारत्वमोजः कान्तिसमाधयः॥
इति वैदर्भमार्गस्य प्राणाः दशगुणाः स्मृताः।
एषां विपर्ययः प्रायो दृश्यते गौडवर्त्मनि॥



श्लेषगुणलक्षणम्-

श्लिष्टमस्पृष्टशैथिल्यमल्पप्राणाक्षरोत्तरम्।

यस्मिन् वाक्ये शिथिलः वर्णविन्यासः न दृश्यते तत् श्लिष्टं। शिथिले वाक्ये अल्पप्राणाः वर्गाणां प्रथमतृतीयपञ्चमाः यरलवास्च प्रधानाः बहुलाः वा भवन्ति। उदा- मालतीदाम लङ्घितं भ्रमरैरिति। अत्र महाप्राणवर्णानां विन्यासात् शैथिल्यं नास्ति। समानार्थमपि मालतीमाला लोलालिकलिला इति वाक्यं शिथिलस्य वाक्यस्य उदाहरणं। शैथिल्ययुक्तं प्रयोगं वैदर्भाः न आद्रियन्ते। किन्तु गौडाः अनुप्रासानुरागेण तत् शैथिल्यं बहु मन्यन्ते।

प्रसादलक्षणं-

प्रसादवत् प्रसिद्धार्थं प्रतीतिसुभगं वचः।

श्रुतिमात्रेणार्थबोधकाः शब्दाः प्रसादगुणयुक्ता आहुः। उदा- इन्दोरिन्दीवरद्युतिः लक्ष्म लक्ष्मीं तनोति। झटित्यर्थोपस्थापका इत्यतः एते प्रसादगुणयुक्ताः।अवयवार्थयुक्तं इति हेतोः गौडीयैः अतिरूढं पदं न स्वीक्रियन्ते। गौडीयैः अप्रसिद्धमपि अर्थं व्युत्पत्तियुक्तं चेत् स्वीक्रियन्ते। उदा- अनत्यर्जुनाब्जन्मसदृक्षाङ्को वलक्षगुः। अत्र अधिकधवलः नीलकमलोपमकलङ्कधारी चन्द्रः भातीति अर्थः। कार्त्तवीर्ये मध्यमपाण्डवे च रूढस्य अर्जुनशब्दस्य श्वेतार्थे प्रयोगः अब्जन्मशब्दस्य कमलार्थे प्रयोगः वलक्षगुशब्दस्य चन्द्रार्थद्योतकत्वं च दोषयुक्तम्। तथापि अवयवार्थादिना ईप्सितम् अर्थं बोधयन्तीत्यतः गौडीयाः एतान् स्वीकुर्वन्ति।

समतालक्षणं

समं बन्धेष्वविषमं। मृदुः स्फुटः मध्यमः इति त्रिविधः बन्धः। येन बन्धेन उपक्रम्यते तेनैव बन्धेन समापनं समता।

मृदुवर्णविन्यासस्य उदाहरणं

कोकिलालापवाचालो मामैति मलयानिलः।

स्फुटवर्णविन्यासस्योदाहारणं-

उच्छलच्छीकराच्छाच्छनिर्झराम्भः कणोक्षितः।

मिश्रवर्णविन्यासस्योदाहरणं-

चन्दनप्रणयोद्गन्धिर्मन्दो मलयमारुतः।

माधुर्यलक्षणं

मधुरं रसवद् वाचि वस्तुन्यपि रसस्थितिः।

येन माद्यन्ति धीमतो मधुनेव मधुव्रताः।यथा भ्रमराः पुष्परसेन आह्लादमनुभवन्ति तथा येन वस्तुना बुद्धिमन्तः माद्यन्ति तत् मधुरं काव्यं।

अनुप्रासविषये वैदर्भगौडीययोः मतभेदनिरूपणं

माधुर्यलक्षणनिरूपणे प्रवृत्तः दण्डी वैदर्भाभिमतं श्रुत्यनुप्रासं निरूपयति।

यया कयाचिच्छ्रुत्या यत्समानमनुभूयते।

तद्रूपा हि पदासत्तिः सानुप्रासा रसावहा॥

यस्य उच्चारणेन यत् समानं पूर्वोच्चारितवर्णसदृशम् आस्वाद्यते तद्रूपा पदप्रयोगः श्रुत्यनुप्रासः।

एष राजा यदा लक्ष्मीं प्राप्तवान् ब्राह्मणप्रियः

तदा प्रभृति धर्मस्य लोकेऽस्मिन्ननुत्सवोऽभवत्।

गौडीयाः अनुप्रासमेव आद्रियन्ते न श्रुत्यनुप्रासं। अनुप्रासलक्षणं तु

वर्णावृत्तिरनुप्रासः पादेषु च पदेषु च।

पूर्वानुभवसंस्कारबोधिनी यद्यदूरता।

श्लोकचतुर्थभागेषु वर्णस्य वर्णयोः वर्णानां वा पुनः पुनरुच्चरणम् अनुप्रासः।

पादगतस्य अनुप्रासस्योदाहरणं दीयते

चन्द्रे शरन्निशोत्तंसे कुन्दस्तबकविभ्रमे

इन्द्रनीलनिभं लक्ष्म संदधात्यलिनः श्रियम्।

पदगतस्यानुप्रासस्योदाहरणं दीयते-

चारु चान्द्रमसं भीरु बिम्बं पश्यैतदम्बरे।

मन्मनो मन्मथाक्रान्तं निर्दयम् हन्तुमुद्यतम्।

सदोषमलङ्कारं वैदर्भाः न आद्रियन्ते। गौडास्तु केवलमनुप्रासलुब्धाः सदोषमपि तमङ्गीकुर्वन्ति।

वर्णसङ्घातगोचरा आवृत्तिः यमकमिति कीर्त्यते। तत्तु न मधुरं। यद्यपि अलङ्काराणां रसपोषकत्वं अस्ति

ग्राम्यतारहितेषु एव स्थलेषु ते रसपोषकतां बिभ्रति। कन्ये कामयमानं मां न त्वं कामयसे कथम्। अत्र ग्राम्यता काव्यशोभां नाशयति।

कां कन्दर्पचाण्डालो मयिवामाक्षि निर्दयः।त्वयि निर्मत्सरो दिष्ट्या।

अत्र अर्थः अग्राम्यः इत्यतः रसावहः। सभ्येतरकीर्त्तनात् शब्दे अपि ग्रम्यता भवति। यथा रत्युत्सवनिरूपणे यकारादिपदं। या भवतः प्रिया इति विच्छिद्य पाठे न ग्राम्यता। किन्तु तदेव पदसन्धानेन पाठितम् असभ्यप्रतीतिं जनयति। खरं प्रहृत्य विश्रान्तः पुरुषो वीर्यवानित्यादीनि वाक्यानि वाक्यार्थगताश्लीलदोषे उभयोरपि मार्गयोः न आद्रियन्ते। भगिनी भगात्यादि शब्दाः सर्वत्र स्वीक्रियन्ते।

सुकुमारतालक्षणं-

अनिष्ठुराक्षरप्रायं। बाहुल्येन कोमलवर्णघटितम् सुकुमारं। केवलं कोमलानां शब्दानां विन्यासे बन्धशैथिल्यदोषः। तस्मात् कोमलाक्षराणां मध्ये मध्ये परुषाक्षरविन्यासेन मुक्तामालाया अन्तरान्तरा रत्नगुम्फनेनैव जायमानं किमपि चारुत्वं सुकुमारत्वम्।

उदा-

मण्डलीकृत्य बर्हाणि कण्ठैर्मधुरगीतिभिः

कलापिनः प्रनृत्यन्ति काले जीमूतमालिनि। मेघमेदुरे काले बर्हाणि मण्डलाकारेण विस्तार्य मधुरगीतिभिः मयूराः सानन्दं नृत्यन्ति। इत्यत्र निष्ठुराक्षरपरित्यागात् सुकुमारतागुणः।

अर्थव्यक्तेः लक्षणं-

अर्थव्यक्तिरनेयत्वम् अर्थस्य।

उदा- हरिणोद्धृता भुः खुरक्षुण्णनागासृग्लोहितादुदधेरिति।

वराहमूर्त्तिना विष्णुना खुरेण ताडिताः ये सर्पाः तेषां शोणितैः रक्तात् सागरात् भूः उपरि नीता।यावन्तः अर्थाः अन्वयबोधोपयिकतया अपेक्ष्यन्ते तद्बोधनाय तावतां पदानां विन्यासः अर्थव्यक्तिः।

उदारत्वलक्षणं-

उत्कर्षवान् गुणः कश्चिद्यस्मिन्नुक्ते प्रतीयते।

तदुदाराह्वयं तेन सनाथा काव्यपद्धतिः।

येन वाक्येन प्रयुज्यमानेन सता वर्णनीयस्य वस्तुनः कोऽपि महिमातिशयो बुद्धिगोचरो भवति तदुदारं वाक्यम्।

उदा- अर्थिनां कृपणा दृष्टिस्त्वन्मुखे पतिता सकृत्।

तदवस्था पुनर्देव नान्यस्य मुखमीक्षते॥ त्वय्यैव पूरिताभिलाषाः दीनाः न याचनाय दात्रन्तरमुपसर्पन्तीत्यर्थः। अत्र दानस्योत्कर्षः स्फुटं प्रतीयते।

ओजसः लक्षणं-

ओजः समासभुयस्त्वमेतद्गद्यस्य जीवितम्। पद्येऽप्यदाक्षिणात्यानामिदमेकं परायणम्। समासबाहुल्यमेव ओजः सतु गद्यस्य जीवितमिति कीर्त्यते। गौडानां पद्ये अपि ओजः दृश्यते। उदाहरणं आख्यायिकादिषु द्रष्टुं शक्यते। पद्ये तु ओजः यथा-

अस्तमस्तकपर्यस्तसमस्तार्कांशुसंस्तरा।

पीनस्तनस्थिताताम्रकम्रवस्त्रेव वारुणी।

कान्तिलक्षणं-

कान्तं सर्वजगत्कान्तं लौकिकार्थानतिक्रमात्।

तच्च वार्ताभिधानेषु वर्णनास्वपि दृश्यते।

लोकप्रसिद्धस्य अर्थस्य वर्णनं कान्तिः।

उदाः- गृहाणि नाम तान्येव तपोराशिर्भवादृशः।

संभावयति यान्येव पावनैः पादपांसुभिः। इत्यादीनि। यत्र भवादृशस्य तपस्विनः पदधूलिः पतति तान्येव गृहाणि धन्यानि तदितराणि त्वधन्यानि तादृशसौभाग्यभाजनत्वाभावाद्। अत्र सत्पुरुषचरणसम्पर्केण गृहाणाम् प्राशस्त्यवर्णनं लोकप्रसिद्धमेवेतीयं वार्ताभिधानरूपायाः कान्तेरुदाहरणम्।

समाधिलक्षणं-

अन्यधर्मस्ततोऽन्यत्र लोकसीमानुरोधिना।

सम्यगाधीयते तत्र स समाधिः स्मृतो यथा।

प्रस्तुतस्य धर्मस्य विरोधाय यत्र सदृशतया अप्रस्तुतधर्मस्य तादात्म्याध्यवसानं समाधिः। उदा- कुमुदानि निमीलन्ति कमलान्युन्मिषन्ति च। अत्र निमीलनोन्मीलने नयनधर्मौ कुमुदसङ्कोचकमलविकासयोः प्रतिपाद्यर्निमीलनोन्मीलनशब्दौ उच्चर्यमाणौ सादृश्यातिशयमहिम्ना सङ्कोचविकासयोरुपचर्येते सादृश्यमूलकमेव तयोः एकशब्दप्रतिपाद्यत्वं। तद्वाचिनी श्रुतिः तच्छब्दवाच्यता। निष्ठ्यादि पदानि लक्षणायां कृतायामेव शोभातिशयं पुष्यन्ति। पुनश्च समाधेः प्राधान्यं दर्शयन्नाह-

तदेतत्काव्यसर्वस्वं समाधिर्नाम योगुणः।

कविसार्थः समग्रोऽपि तमेनमनुगच्छति।

एवं वैदर्भगौडीययोः भेदः प्रपञ्चितोऽपि प्रतिकविस्थिताः तद्भेदाः वक्तुं न शक्यते यतः

इक्षुक्षीरगुडादीनां माधुर्यस्यान्तरं महत्।

तथापि न तदाख्यातुम् सरस्वत्यापि शक्यते।

इक्षुः प्रभृतीनाम् मधुरपदार्थानां माधुर्यस्य महदन्तरमस्ति तथापि तेषां मध्ये कः भेदः इति वाचामधिष्ठात्र्या सरस्वत्या अपि वक्तुं न शक्यते।

काव्यकारणनिरूपणं

नैसर्गिकी च प्रतिभा श्रुतं च बहु निर्मलम्।

अमन्दश्चाभियोगोऽस्याः कारणं काव्यसम्पदः।

दण्डी तु पूर्वजन्मसंस्कारासादिताम् प्रज्ञां शास्त्राभ्यसनं अविच्छिन्ना काव्यानुशीलनं च काव्यकारणत्वेन स्वीकरोति।

न विद्यते यद्यपि पूर्ववासनागुणानुबन्धिप्रतिभानमद्भुतम्।

श्रुतेन यत्नेन च वागुपासिता ध्रुवं करोत्येव कमप्यनुग्रहम्।

पूर्वोक्तस्य प्रतिभायाः अभावे उत्तरौ द्वावपि कथमपि एकं कवित्वव्यपदेशार्हं विदधाति। सर्वथा सरस्वत्युपासनीया यतः-

तदस्तन्द्रैरनिशं सरस्वति श्रमादुपास्या खलु कीर्तिमीप्सुभिः।

कृशे कवित्वेऽपि जनाः कृतश्रमा विदग्धगोष्ठीषु विहर्तुमीशते।

♦♦♦♦♦♦♦

MODULE III TEXT

आचार्यदण्डिविरचितः

काव्यलक्षणापराभिधः

काव्यादर्शः

प्रथमः परिच्छेदः

चतुर्मुखमुखाम्भोजवनहंसवधूर्मम।
मानसे रमतां नित्यं सर्वशुक्ला सरस्वती॥१॥

पूर्वशास्त्राणि संहृत्य प्रयोगानुपलक्ष्य च।
यथासामर्थ्यमस्माभिः क्रियते काव्यलक्षणम्॥२॥

इह शिष्टानुशिष्टानां शिष्टानामपि सर्वथा।
वाचामेव प्रसादेन लोकयात्रा प्रवर्तते॥३॥

इदमन्धन्तमः कृत्स्नं जायेत भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते॥४॥

आदिराजयशोबिम्बमादर्शं प्राप्य वाङ्मयम्।
तेषामसन्निधानेऽपि न स्वयं पश्य नश्यति॥५॥

गौर्गोः कामदुघा सम्यक्प्रयुक्ता स्मर्यते बुधैः।
दुष्प्रयुक्ता पुनर्गोत्वं प्रयोक्तुः सैव शंसति॥६॥

तदल्पमपि नोपेक्ष्यं काव्ये दुष्टं कथञ्चन।
स्याद्वपुः सुन्दरमपि श्वित्रेणैकेन दुर्भगम्॥७॥

गुणदोषानशास्त्रज्ञः कथं विभजते जनः।

किमन्धस्याधिकारोऽस्ति रूपभेदोपलब्धिषु॥८॥

अतः प्रजानां व्युत्पत्तिमभिसन्धाय सूरयः।

वाचां विचित्रमार्गाणां निबबन्धुः क्रियाविधिम्॥९॥

तैः शरीरं च काव्यानामलङ्काराश्च दर्शिताः।

शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली॥१०॥

गद्यं पद्यं च मिश्रं च तत्त्रिधैव व्यवस्थितम्।

पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा॥११॥

छन्दोविचित्यां सकलस्तत्प्रपञ्चो निदर्शितः।

सा विद्या नौस्तितीर्षूणां गम्भीरं काव्यसागरम्॥१२॥

मुक्तकं कुलकं कोषः संघात इति तादृशः।

सर्गबन्धाङ्ग रूपत्वादनुक्तः पद्यविस्तरः॥१३॥

सर्गबन्धो महाकाव्यमुच्यते तस्य लक्षणम्।

आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्॥१४॥

इतिहासकथोद्भूतमितरद्वा सदाश्रयम्।

चतुर्वर्गफलोपेतं चतुरोदात्तनायकम्॥१५॥

नगरार्णवशैलर्तुचन्द्रार्कोदयवर्णनैः।

उद्यानसलिलक्रीडामधुपानरतोत्सवैः॥१६॥

विप्रलम्भैर्विवाहैश्च कुमारोदयवर्णनैः।

मन्त्रदूतप्रयाणाऽजिनायकाभ्युदयैरपि॥१७॥

अलङ्कृतमसंक्षिप्तं रसभावनिरन्तरम्।

सर्गैरनतिविस्तीर्णैः श्रव्यवृत्तैः सुसन्धिभिः॥१८॥

सर्वत्र भिन्नवृत्तान्तैरुपेतं लोकरञ्जकम्।

काव्यं कल्पान्तरस्थायि जायेत सदलङ्कृति॥१९॥

न्यूनमप्यत्र यैः कैश्चिदङ्गैः काव्यं न दुष्यति।

यद्यपात्तेषु सम्पत्तिराराधयति तद्विदः॥२०॥

गुणतः प्रागुपन्यस्य नायकं तेन विद्विषाम्।

निराकरणमित्येष मार्गः प्रकृतिसुन्दरः॥२१॥

वंशवीर्यश्रुतादीनि वर्णयित्वा रिपोरपि।

तज्जयान्नायकोत्कर्षवर्णनं च धिनोति नः॥२२॥

अपादः पदसन्तानो गद्यमाख्यायिका कथा।

इति तस्य प्रभेदौ द्वौ तयोराख्यायिका किल॥२३॥

नायकेनैव वाच्याऽन्या नायकेनेतरेण वा।

स्वगुणाविष्क्रिया दोषो नात्र भूतार्थशंसिनः॥२४॥

अपि त्वनियमो दृष्टस्तत्राप्यन्यैरुदीरणात्।

अन्यो वक्ता स्वयं वेति कीदृग्वा भेदकारणम्॥२५॥

वक्त्रं चापरवक्त्रं च सोच्छ्वासत्वं च भेदकम्।

चिह्नमाख्यायिकायाश्चेत् प्रसङ्गेन कथास्वपि॥२६॥

आर्यादिवत्प्रवेशः किं न वक्त्रापरवक्त्रयोः।

भेदश्च दृष्टो लम्भादिरुच्छ्वासो वास्तु किं ततः॥२७॥

तत्कथाख्यायिकेत्येका जातिः संज्ञाद्वयाङ्किता।

अत्रैवान्तर्भविष्यन्ति शेषाश्चाख्यानजातयः॥२८॥

कन्याहरणसंग्रामविप्रलम्भोदयादयः।

सर्गबन्धसमा एव नैते वैशेषिका गुणाः॥२९॥

कविभावकृतं चिह्नमन्यत्रापि न दुष्यति।

मुखमिष्टार्थसंसिद्ध्यै किं हि न स्यात्कृतात्मनाम्॥३०॥

मिश्राणि नाटकादीनि तेषामन्यत्र विस्तरः।

गद्यपद्यमयी काचिच्चम्पूरित्यभिधीयते॥३१॥

तदेतद् वाङ्मयं भूयः संस्कृतं प्राकृतं तथा।

अपभ्रंशश्च मिश्रं चेत्याहुरार्या श्चतुर्विधम्॥३२॥

संस्कृतं नाम दैवी वागन्वाख्याता महर्षिभिः।

तद्भवस्तत्समो देशीत्यनेकः प्राकृतक्रमः॥३३॥

महाराष्ट्राश्रयां भाषां प्रकृष्टं प्राकृतं विदुः।

सागरः सूक्तिरत्नानां सेतुबन्धादि यन्मयम्॥३४॥

शौरसेनी च गौडी च लाटी चान्या च तादृशी।

याति प्राकृतमित्येवं व्यवहारेषु सन्निधिम्॥३५॥

आभीरादिगिरः काव्येष्वपभ्रंश इति स्मृताः।

शास्त्रेषु संस्कृतादन्यदपभ्रंशतयोदितम्॥३६॥

संस्कृतं सर्गबन्धादि प्राकृतं स्कन्धकादिकम्।

ओसरादिरपभ्रंशो नाटकादि तु मिश्रकम्॥३७॥

कथा हि सर्वभाषाभिः संस्कृतेन च बध्यते।

भूतभाषामयीं प्राहुरद्भुतार्थां बृहत्कथाम्॥३८॥

लास्यच्छलितशल्यादि प्रेक्षार्थमितरत्पुनः।

श्रव्यमेवेति सैषापि द्वयी गतिरुदाहृता॥३९॥

अस्त्यनेको गिरां मार्गः सूक्ष्मभेदः परस्परम्।

तत्र वैदर्भगौडीयौ वर्ण्येते प्रस्फुटान्तरौ॥४०॥

श्लेषः प्रसादः समता माधुर्यं सुकुमारता।

अर्थव्यक्तिरुदारत्वमोजः कान्तिसमाधयः॥४१॥

इति वैदर्भमार्गस्य प्राणा दश गुणाः स्मृताः।

एषां विपर्ययः प्रायो दृश्यते गौडवर्त्मनि॥४२॥

श्लिष्टमस्पृष्ट शैथिल्यमल्पप्राणाक्षरोत्तरम्।

शिथिलं मालतीमाला लोलालिकलिला यथा॥४३॥

अनुप्रासधिया गौडैस्तदिष्टं बन्धगौरवात्।

वैदर्भैर्मालितीदाम लङ्घितं भ्रमरैरिति॥४४॥

प्रसादवत्प्रसिद्धार्थमिन्दोरिन्दीवरद्युति।

लक्ष्म लक्ष्मीं तनोतीति प्रतीतिसुभगं वचः॥४५॥

व्युत्पन्नमिति गौडीयैर्नातिरूढमपीष्यते।

यथाऽनत्यर्जुनाब्जन्मसदृक्षाङ्को वलक्षगुः॥४६॥

समं बन्धेष्वविषमं ते मृदुस्फुटमध्यमाः।

बन्धा मृदुस्फुटोन्मिश्रवर्णविन्यासयोनयः॥४८॥

कोकिलालापवाचालो मामेति मलयानिलः।

उच्छलच्छीकराच्छाच्छनिर्झराम्भः कणोक्षितः॥४८॥

चन्दनप्रणयोद्गन्धिर्मन्दो मलयमारुतः।

स्पर्धते रुद्धमद्धैर्यो वररामाननानिलैः॥४९॥

इत्यनालोच्य वैषम्यमर्थालङ्कारडम्बरम्।

अपेक्षमाणाववृते पौरस्त्या काव्यपद्धतिः॥५०॥

मधुरं रसवद्वाचि वस्तुन्यपि रसस्थितिः।

येन माद्यन्ति धीमन्तो मधुनेव मधुव्रताः॥५१॥

यया कयापि श्रुत्या यत्समानमनुभूयते।

तद्रूपा हि पदासत्तिः सानुप्रासा रसावहा॥५२॥

एष राजा यदा लक्ष्मीं प्राप्तवान् ब्राह्मणप्रियः।

तदा प्रभृति धर्मस्य लोकेऽस्मिन्नुत्सवोऽभवत्॥५३॥

इतीदं नादृतं गौडैरनुप्रासस्तु तत्प्रियः।

अनुप्रासादपि प्रायो वैदर्भैरिदमिष्यते॥५४॥

वर्णावृत्तिरनुप्रासः पादेषु च पदेषु च।

पुर्वानुभवसंस्कारबोधिनी यद्यदूरता॥५५॥

चन्द्रे शरन्निशोत्तंसे कुन्दस्तबकसन्निभे।

इन्द्रनीलनिभं लक्ष्म सन्दधात्यलिनः श्रियम्॥५६॥

चारु चान्द्रमसं भीरु बिम्बं पश्यैतदम्बरे।

मन्मनो मन्मथाक्रान्तं निर्दयं हन्तुमुद्यतम्॥५७॥

इत्यनुप्रासमिच्छन्ति नातिदूरान्तरश्रुतिम्।

न तु रामामुखाम्भोजसदृशश्चन्द्रमा इति॥५८॥

स्मरः खरः खलः कान्तः कायः कोपश्च नः कृशः।

च्युतो मानोऽधिको रागो मोहो जातोऽसवो गताः॥५९॥

इत्यादि बन्धपारुष्यं शैथिल्यं च नियच्छति।

अतो नैवमनुप्रासं दाक्षिणात्याः प्रयुञ्जते॥६०॥

आवृत्ति वर्णसंघातगोचरां यमकं विदुः।

तत्तु नैकान्तमधुरमतः पश्चाद् विधास्यते॥६१॥

कामं सर्वोऽप्यलङ्कारो रसमर्थे निषिञ्चति३।

तथाप्यग्राम्यतैवैनं भारं वहति भूयसा॥६२॥

कन्ये कामयमानं मां न त्वं कामयसे कथम्।

इति ग्राम्योऽयमर्थात्मा वैरस्याय प्रकल्पते॥६३॥

कामं कन्दर्पचाण्डालो मयि वामाक्षि निष्ठुरः।

त्वयि निर्मत्सरो दिष्ट्येत्यग्राम्योऽर्थो रसावहः॥६४॥

शब्देऽपि ग्राम्यतास्त्येव सा सभ्येतरकीर्तनात्।

यथा यकारादिपदं रत्युत्सवनिरूपणे॥६५॥

पदसन्धानवृत्त्या वा वाक्यार्थत्वेन वा पुनः।

दुष्प्रतीतिकरं ग्राम्यं यथा या भवतः प्रिया॥६६॥

खरं प्रहृत्य विश्रान्तः पुरुषो वीर्यवानिति।

एवमादि न शंसन्ति मार्गयोरुभयोरपि॥६७॥

भगिनीभगवत्यादि सर्वत्रैवानुमन्यते।

विभक्तमिति माधुर्यमुच्यते सुकुमारता॥६८॥

अनिष्ठुराक्षरप्रायं सुकुमारमिहेष्यते।

बन्धशैथिल्यदोषस्तु दर्शितः सर्वकोमले॥६९॥

मण्डलीकृत्य बर्हाणि कण्ठैर्मधुरगीतिभिः।

कलापिनः प्रनृत्यन्ति काले जीमूतमालिनि॥७०॥

इत्यनूर्जित एवार्थो नालङ्कारोऽपि तादृशः।

सुकुमारतयैवैतदारोहति सतां मनः॥७१॥

दीप्तमित्यपरैर्भूम्ना कृच्छ्रोद्यमपि बध्यते।
न्यक्षेण क्षपितः पक्षः क्षत्रियाणां क्षणादिति॥७२॥

अर्थव्यक्तिरनेयत्वमर्थस्य हरिणोद्धृता।
भूः खुरक्षुण्णनागासृग्लोहितादुदधेरिति॥७३॥

मही महावराहेण लोहितादुद्धृतोदधेः।
इतीयत्येव निर्दिष्टे नेयत्वमुरगासृजः॥७४॥

नेदृशं बहु मन्यन्ते मार्गयोरुभयोरपि।
न हि प्रतीतिः सुभगा शब्दन्यायविलङ्घिनी॥७५॥

उत्कर्षवान् गुणः कश्चिद् यस्मिन्नुक्ते प्रतीयते।
तदुदाराह्वयं तेन सनाथा सर्वपद्धतिः॥७६॥

अर्थिनां कृपणा दृष्टिस्त्वन्मुखे पतिता सकृत्।
तदवस्था पुनर्देव नान्यस्य मुखमीक्षते॥७७॥

इति त्यागस्य वाक्येऽस्मिन्नुत्कर्षः साधु लक्ष्यते।
अनेनैव पथान्यच्च समानन्यायमूह्यताम्॥७८॥

श्लाघ्यैर्विशेषणैर्युक्तमुदारं कैश्चिदिष्यते।
यथा लीलाम्बुजक्रीडासरोहेमाङ्गदादयः॥७९॥

ओजः समासभूयस्त्वमेतद् गद्यस्य जीवितम्।

पद्येऽप्यदाक्षिणात्यानामिदमेकं परायणम्॥८०॥

तद् गुरूणां लघूनां च बाहुल्याल्पत्वमिश्रणैः।

उच्चावचप्रकारं सद् दृश्य माख्यायिकादिषु॥८१॥

अस्तमस्तकपर्यस्तसमस्तार्कांशुसंस्तरा।

पीनस्तनस्थिताताम्रवस्त्रेवाभाति वारुणी॥८२॥

इति पद्येऽपि पौरस्त्या बध्नन्त्योजस्विनीर्गिरः।

अन्ये त्वनाकुलं हृद्यमिच्छन्त्योजो गिरां यथा॥८३॥

पयोधरतटोत्सङ्गलग्नसन्ध्यातपांशुका।

कस्य कामातुरं चेतो वारुणी न करिष्यति॥८४॥

कान्तं सर्वजगत्कान्तं लौकिकार्थानतिक्रमात्।

तच्च वार्ताभिधानेषु वर्णनास्वपि दृश्यते॥८५॥

गृहाणि नाम तान्येव तपोराशिर्भवादृशः।

सम्भावयति यान्येव पावनैः पादपांसुभिः॥८६॥

अनयोरनवद्याङ्गि स्तनयोर्जृम्भमाणयोः।

अवकाशो न पर्याप्तस्तव बाहुलतान्तरे॥८७॥

इति सम्भाव्यमेवैतद् विशेषाख्यानसंस्कृतम्।

कान्तं भवति सर्वस्य लोकयात्रानुवर्तिनः॥८८॥

लोकातीत इवात्यर्थमध्यारोप्य विवक्षितः।

योऽर्थस्तेनातितुष्यन्ति विदग्धा नेतरे जनाः॥८९॥

देवधिष्ण्यमिवाराध्यमद्यप्रभृति नो गृहम्।

युष्मत्पादरजः पातधौतनिःशेषकल्मषम्॥९०॥

अल्पं निर्मितमाकाशमनालोच्यैव वेधसा।

इदमेवंविधं भावि भवत्याः स्तनजृम्भणम्॥६१॥

इदमत्युक्तिमेतद् गौडोपलालितम्।

प्रस्थानं प्राक्प्रणीतं तु सारमन्यस्य वर्त्मनः॥९२॥

अन्यधर्मस्ततोऽन्यत्र लोकसीमानुरोधिना।

सम्यगाधीयते यत्र स समाधिः स्मृतो यथा॥९३॥

कुमुदानि निमीलन्ति कमलान्युन्मिषन्ति च।

इति नेत्रक्रियाध्यासाल्लब्धा तद्वाचिनी श्रुतिः॥९४॥

निष्ठ्यूतोद्गीर्णवान्तादि गौणवृत्तिव्यपाश्रयम्।

अतिसुन्दरमन्यत्र ग्राम्यकक्षां विगाहते॥९५॥

पद्मान्यर्कांशुनिष्ठ्यूताः पीत्वा पावकविप्रुषः।

भूयो वमन्तीव मुखैरुद्गीर्णारुणरेणुभिः॥९६॥

इति हृद्यमहृद्यं तु निष्ठीवति वधूरिति।

युगपन्नैकधर्माणामध्यासश्च स्मृतो यथा॥९७॥

गुरुगर्भभरक्लान्ताः स्तनन्त्यो मेघपङ्क्तयः।

अचलाधित्यकोत्सङ्गमिमाः समधिशेरते॥९८॥

उत्सङ्गे शयनं संख्याः स्तननं गौरवं क्लमः।

इतीमे गर्भिणीधर्मा बहवोऽन्यत्र दर्शिताः॥९९॥

इति मार्गद्वयं भिन्नं तत्स्वरूपनिरूपणात्।

तद्भेदास्तु न शक्यन्ते वक्तुं प्रतिकवि स्थिताः॥१०१॥

इक्षुक्षीरगुडादीनां माधुर्यस्यान्तरं महत्।

तथापि न तदाख्यातुं सरस्वत्यपि शक्यते॥१०२॥

नैसर्गिकी च प्रतिभा श्रुतं च बहु निर्मलम्।

अमन्दश्चाभियोगोऽस्याः कारणं काव्यसम्पदः॥१०३॥

न विद्यते यद्यपि पूर्ववासनागुणानुबन्धि प्रतिभानमद्भुतम्।

श्रुतेन यत्नेन च वागुपासिता ध्रुवं करोत्येव कमप्यनुग्रहम्॥१०४॥

तदस्ततन्द्रैरनिशं सरस्वती श्रमादुपास्या खलु कीर्तिमीप्सुभिः।

कृशे कवित्वेऽपि जनाः कृतश्रमा विदग्धगोष्ठीषु विहर्तुमीशते॥१०५॥

इत्याचार्यदण्डिनःकृतौ काव्यादर्शे मार्गविभागो नाम प्रथमः परिच्छेदः।